# shrI sUrya aShTottarashatanAma stotraM

# શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : sUrya aShTottarashatanAma stotraM

File name : sUrya108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીસૂર્યાષ્ટોત્તરશતનામસ્તોત્રમ્

સૂર્ય બીજ મન્ત્ર - ૐ હ્રાઁ હ્રીં હ્રૌં સઃ સૂર્યાય નમઃ ॥

અરુણાય શરણ્યાય કરુણારસસિન્ધવે ।
અસમાનબલાયાઽર્તરક્ષકાય નમો નમઃ ॥ ૧॥

આદિત્યાયાઽદિભૂતાય અખિલાગમવેદિને ।
અચ્યુતાયાઽખિલજ્ઞાય અનન્તાય નમો નમઃ ॥ ૨॥

ઇનાય વિશ્વરૂપાય ઇજ્યાયૈન્દ્રાય ભાનવે ।
ઇન્દિરામન્દિરાપ્તાય વન્દનીયાય તે નમઃ ॥ ૩॥

ઈશાય સુપ્રસન્નાય સુશીલાય સુવર્ચસે ।
વસુપ્રદાય વસવે વાસુદેવાય તે નમઃ ॥ ૪॥

ઉજ્જ્વલાયોગ્રરૂપાય ઊર્ધ્વગાય વિવસ્વતે ।
ઉદ્યત્કિરણજાલાય હૃષીકેશાય તે નમઃ ॥ ૫॥

ઊર્જસ્વલાય વીરાય નિર્જરાય જયાય ચ ।
ઊરુદ્વયાભાવરૂપયુક્તસારથયે નમઃ ॥ ૬॥

ઋષિવન્દ્યાય રુગ્ઘન્ત્રે ઋક્ષચક્રચરાય ચ ।
ઋજુસ્વભાવચિત્તાય નિત્યસ્તુત્યાય તે નમઃ ॥ ૭॥

ૠકારમાતૃકાવર્ણરૂપાયોજ્જ્વલતેજસે ।
ૠક્ષાધિનાથમિત્રાય પુષ્કરાક્ષાય તે નમઃ ॥ ૮॥

લુપ્તદન્તાય શાન્તાય કાન્તિદાય ઘનાય ચ ।
કનત્કનકભૂષાય ખદ્યોતાય તે નમઃ ॥ ૯॥

લૂનિતાખિલદૈત્યાય સત્યાનન્દસ્વરૂપિણે ।
અપવર્ગપ્રદાયાઽર્તશરણ્યાય નમો નમઃ ॥ ૧૦॥

એકાકિને ભગવતે સૃષ્ટિસ્થિત્યન્તકારિણે ।

ગુણાત્મને ઘૃણિભૃતે બૃહતે બ્રહ્મણે નમઃ ॥ ૧૧॥

ઐશ્વર્યદાય શર્વાય હરિદશ્વાય શૌરયે ।
દશદિક્સમ્પ્રકાશાય ભક્તવશ્યાય તે નમઃ ॥ ૧૨॥

ઓજસ્કરાય જયિને જગદાનન્દહેતવે ।
જન્મમૃત્યુજરાવ્યાધિવર્જિતાય નમો નમઃ ॥ ૧૩॥

ઓઉન્નત્યપદસઞ્ચારરથસ્થાયાત્મરૂપિને ।
કમનીયકરાયાઽબ્જવલ્લભાય નમો નમઃ ॥ ૧૪॥

અન્તર્બહિઃપ્રકાશાય અચિન્ત્યાયાઽત્મરૂપિણે ।
અચ્યુતાય સુરેષાય પરસ્મૈજ્યોતિષે નમઃ ॥ ૧૫॥

અહસ્કરાય રવયે હરયે પરમાત્મને ।
તરુણાય વરેણ્યાય ગ્રહાણામ્પતયે નમઃ ॥ ૧૬॥

ૐ નમો ભાસ્કરાયાઽદિમધ્યાન્તરહિતાય ચ ।
સૌખ્યપ્રદાય સકલજગતામ્પતયે નમઃ ॥ ૧૭॥

નમઃ સૂર્યાય કવયે નમો નારાયણાય ચ ।
નમો નમઃ પરેશાય તેજોરૂપાય તે નમઃ ॥ ૧૮॥

ૐ શ્રીં હિરણ્યગર્ભાય ૐ હ્રીં સમ્પત્કરાય ચ ।
ૐ ઐં ઇષ્ટાર્થદાયાઽનુપ્રસન્નાય નમો નમઃ ॥ ૧૯॥

શ્રીમતે શ્રેયસે ભક્તકોટિસૌખ્યપ્રદાયિને ।
નિખિલાગમવેદ્યાય નિત્યાનન્દાય તે નમઃ ॥ ૨૦॥

યો માનવઃ સન્તતમર્કમર્ચયન્પઠેત્પ્રભાતે વિમલેન ચેતસા ।
ઇમાન્ નામાનિ ચ તસ્ય પુણ્યમાયુર્ધનં ધાન્યમુપૈત્તિ નિત્યમ્ ॥૨૧॥

ઇમં સ્તવં દેવવરસ્ય કીર્તયેચ્છ્રુણોતિ યોઽયં સુમનાઃ સમાહિતઃ ।
સ મુચ્યતે શોકદવાગ્નિસાગરાલ્લભેત સર્વં મનસો યથેપ્સિતમ્ ॥

ઇતિ શ્રીમદથર્વણરહસ્યે સૂર્યાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*shrI sUrya aShTottarashatanAma stotraM*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*